# संस्कृत
# अष्टम् कक्षा
# श्रुति जायसवाल

अष्टमवर्गस्य
“रुचिरा”

संस्कृतपाठ्यपुस्तकम्

अनुशिक्षणम्
Tutorials




प्रथमः पाठः



## सुभाषितानि

# सुभाषितानि




“सुभाषितानि” - सुन्दराणि, मधुराणि हितकराणि च वचनानि ।

(‘सुभाषित’ अकारान्तः,नपुंसकलिङ्गम्,प्रथमा विभक्तिः,बहुवचनम् )

श्लोकरूपेण एतानि सुन्दराणि वचनानि सूक्तिमञ्जरी-नीतिशतक-मनुस्मृति शिशुपालवध-पञ्चतन्त्र-आदिग्रन्थेभ्यः संगृहीतानि । एतानि सुन्दराणि मधुराणि च सुभाषितानि अस्माकं व्यक्तित्व-विकासाय प्रोत्साहनाय च अमृतवचनानि सन्ति ।

# पाठवाचनम्

## सुभाषितानि

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ।।1।।

साहित्यसङ्गीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम् ।।2।।

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ।।3।।

पीत्वा रसं तु कटुकं मधुरं समानं
माधुर्यमेव जनयेन्मधुमक्षिकासौ।
सन्तस्तथैव समसज्जनदुर्जनानां
श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति।।4।।

महतां प्रकृतिः सैव वर्धितानां परैरपि।
न जहाति निजं भावं संख्यासु लाकृतिर्यथा।।5।।

स्त्रियां रोचमानायां सर्वं तद् रोचते कुलम्।
तस्यां त्वरोचमानायां सर्वमेव न रोचते।।6।।

## गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः ।
## सुस्वादुतोयाः प्रभवन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥1॥







### पदच्छेदः

गुणाः, गुणज्ञेषु, गुणाः, भवन्ति, ते, निर्गुणम्, प्राप्य, भवन्ति, दोषाः, सुस्वादु-तोयाः, प्रभवन्ति, नद्यः, समुद्रम्, आसाद्य, भवन्ति, अपेयाः ।

### अन्वयः

गुणाः गुणज्ञेषु गुणाः भवन्ति, ते (गुणाः) निर्गुणं प्राप्य दोषाः भवन्ति । सुस्वादुतोयाः नद्यः प्रभवन्ति (परन्तु नद्यः) समुद्रम् आसाद्य (नद्यः) अपेयाः भवन्ति ।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| गुणाः | ('गुण' अका.,पुं.,प्र.वि.,बहुव.) | = | धर्मः/स्वभावः/वैशिष्ट्यम् । |
| गुणज्ञेषु | ('गुणज्ञ' अका.,पुं.,स.वि.,बहुव.) | = | गुणयुक्त-जनेषु । |
| भवन्ति | ('भू' धातुः, लट्ल.,प्र.पु.,बहुव.) | = | 'सन्ति' । |
| ते | ('तद्' दका.,सर्व.,पुं.,प्र.वि.,बहुव.) | = | ते (गुणाः) । |
| निर्गुणम् | ('निर्' उप., 'गुण' अका.,पुं.,द्वि.वि.,ए.व.) | = | गुणहीनं (जनम्) । |
| प्राप्य | ('प्र' उपसर्गः, 'आप्' धातुः, 'ल्यप्' प्रत्ययः) | = | लब्ध्वा / मिलित्वा । |
| दोषाः | ('दोष' अका.,पुं.,प्र.वि.,बहुव.) | = | दुर्गुणाः / अनिष्ट-फलम् । |
| सुस्वादुतोयाः | ('सु-स्वादु-तोया' आका.,स्त्री.,प्र.वि.,बहुव.) | = | स्वादिष्ट-जल-युक्ताः । |
| नद्यः | ('नदी' ईका.,स्त्रीलि.,प्र.पु.,बहुव. ) | = | सरितः, तरङ्गिण्यः । |
| प्रभवन्ति | ('प्र' उपसर्गः, 'भू' धातुः,लट्ल.,प्र.पु.,बहुव.) | = | वहन्ति । |
| समुद्रम् | ('समुद्र' अका.,पुं.,द्वि.वि.,ए.व. ) | = | जलधिम्,सागरम् । |
| आसाद्य | ('आ' उप, 'सद्' धातुः, 'णिच्' 'ल्यप्' प्रत्ययौ) | = | प्राप्य । |
| अपेयाः | (न+पेयाः, 'अपेया' आका., स्त्री.,प्र.वि.,ब.व.) | = | पातुम् अयोग्याः । |

श्लोके सुस्वादुतोयाः इत्यत्र तोयाः (विशेषणम्) स्त्रीलिङ्गे प्रयुक्तम् – तोयम् इति नपुंसकलिङ्गम् ।

**भाव-बोधनम्**

गुणा गुणज्ञेषु गुणा भवन्ति , ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति नद्याः, समुद्रमासाद्य भवन्त्यापेयाः ॥

- गुणाः केषु सद्गुणाः भवन्ति ?
- गुणज्ञेषु सद्गुणाः के भवन्ति ?
- गुणाः गुणज्ञेषु केन रूपेण भवन्ति ?
- गुणाः कं प्राप्य दोषाः भवन्ति ?
- श्लोके 'ते' इति पदं केभ्यः प्रयुक्तम्?
- काः प्रभवन्ति ?
- नद्यः कीदृश्यः प्रभवन्ति ?
- काः अपेयाः भवन्ति ?
- नद्यः कदा अपेयाः भवन्ति ?
- 'आसाद्य' इति पदेन कः अभिप्रायः ?

- ✓ गुणाः गुणज्ञेषु सद्गुणाः भवन्ति ।
- ✓ गुणज्ञेषु सद्गुणाः गुणाः भवन्ति ।
- ✓ गुणाः गुणज्ञेषु सद्गुण-रूपेण भवन्ति ।
- ✓ गुणाः निर्गुणं प्राप्य दोषाः भवन्ति ।
- ✓ श्लोके 'ते' इति पदं गुणेभ्यः प्रयुक्तम् ।
- ✓ नद्यः प्रभवन्ति ।
- ✓ नद्यः सुस्वादुतोयाः प्रभवन्ति ।
- ✓ सुस्वादु-तोयाः नद्यः अपेयाः भवन्ति ।
- ✓ नद्यः समुद्रम् आसाद्य अपेयाः भवन्ति ।
- ✓ 'आसाद्य' अर्थात् प्राप्य इति अभिप्रायः ।

गुणा गुणज्ञेषु गुणा भवन्ति , ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति नद्याः, समुद्रमासाद्य भवन्त्यापेयाः ॥

## भावार्थः

गुणाः गुणीजनेषु सद्गुणाः भवन्ति, परन्तु ते एव गुणाः निर्गुणं जनं प्राप्य दोषाः भवन्ति । यथा नदीनां जलं यावत् पर्यन्तं नदीषु भवति तावत् पर्यन्तं तद् जलं मधुरं पातुं च योग्यं भवति, परन्तु तदेव जलं यदा समुद्रे पतति तर्हि तद् जलं पातुं योग्यं न भवति ।

## भावार्थः (हिन्द्याम्)

विद्वान् और गुणी व्यक्तियों के पास जाकर गुण, सद्गुण के रूप में परिवर्तित हो जाता है, परन्तु वे ही गुण, गुणहीन व्यक्तियों के संसर्ग में दोषों के रूप में परिणत हो जाते हैं । यथा, नदियों में मधुर स्वाद वाला पीने योग्य जल प्रवाहित होता है, परन्तु वही जल समुद्र के जल में मिल जाता है तो खारा हो जाता है तथा पीने योग्य नहीं रहता है ।

## भावार्थः (आङ्ग्लेन)

The flowing (water) in the river is sweet & drinkable. Once it reaches sea it acquires salty nature and hence becomes undrinkable. Similarly, qualities a person remain a virtue in good company and they turn evil in bad company.

साहित्यसङ्गीतकलाविहीनः ,
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः ,
तद्भागधेयं परमं पशूनाम्।।2।।

*(नीतिशतकम् - 28)*




### पदच्छेदः

साहित्य-सङ्गीत-कला-विहीनः, साक्षात्-पशुः, पुच्छ-विषाण-हीनः,
तृणम्, न, खादन्, अपि, जीवमानः, तत्, भागधेयम्, परमम्, पशूनाम् ।

### अन्वयः

(यः मनुष्यः) साहित्य-सङ्गीत-कला-विहीनः (अस्ति, सः) पुच्छ-विषाण-हीनः साक्षात्पशुः (इव अस्ति) । तृणं न खादन् अपि (सः) जीवमानः (अस्ति), तत् पशूनां परमं भागधेयम् (अस्ति) ।



साहित्यसङ्गीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः, तद्भागधेयं परमं पशूनाम् ।।2।।

- साहित्यसङ्गीतकलाविहीनः

(साहित्यं सङ्गीतं कला च साहित्यसङ्गीतकलाः ताभिः विहीनः = साहित्यसङ्गीतकलाविहीनः)

- साहित्यम् (‘साहित्य’अका.,नपुं.,प्र.वि.,ए.व.) = काव्यम्, नाटकम्, गीतम् .....।
- सङ्गीतम् (‘सङ्गीत’अका.,नपुं.,प्र.वि.,ए.व.) = सङ्गीतविद्या ।
- कला (‘कला’ आका.,स्त्री.,प्र.वि.,ए.व.) = शिल्पम्,नृत्यम्,चित्रम्,अभिनयः ....।
- विहीनः (‘विहीन’ अका.,पुं.प्र.वि.,ए.व.) = रहितः ।

- पुच्छः ('पुच्छ' अका.,पुं.,प्र.वि.,ए.व.) = लाङ्गूलम् / पूँछ ।
- विषाणम् ('विषाण'अका.,नपुं.,प्र.वि.,ए.व.) = शृङ्गम् / सींग ।
- हीनः ('हीन'अका.,पुं.,प्र.वि.,ए.व.) = रहितः ।
- साक्षात् (अव्ययपदम्) = वस्तुतः / प्रत्यक्षम् ।



साहित्यसङ्गीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः, तद्भागधेयं परमं पशूनाम्।।2।।

- पशुः ('पशु' उका.,पुं.,प्र.वि.,एक.व.) = जन्तुविशेषः (यथा, मूषकः,विडालः,कुक्कुरः...)
- तृणम् ('तृण'अका.,नपुं.,प्र.वि.,एक.व.) = घासः / घास (हिन्द्यर्थः) ।
- न (अव्ययपदम्) = नहि ।
- खादन् ('खाद्'धातुः, 'शतृ' प्र., पुं.,प्र.वि.,ए.व.) = भक्षयन् ।
- अपि (अव्ययपदम्) = 'भी' (हिन्द्यर्थः) ।
- जीवमानः ('जीव्'धातुः, 'शानच्'प्र., पुं.,प्र.वि.,एक.व.) = जीवितः अस्ति ।
- तत् ('तद्'सर्वनामशब्दः,नपुं.,प्र.वि.,एक.व.) अर्थात् तृणम् अखादन् अपि जीवनम् ।
- पशूनाम् ('पशु'उका.,पुं.,ष.वि.,बहु.व.) = जन्तूनाम् ।
- परमम् ('परम'अका.,नपुं.,प्र.वि.,एक.व.) = अत्यधिकम् ।
- भागधेयम् ('भागधेय'अका.,नपुं.,प्र.वि.,एक.व.) = सौभाग्यम् ।

भाव-बोधनम्






☞ पशुः इव कः भवति ?
- साहित्य-सङ्गीत-कला-विहीनः जनः पशुः इव भवति ।

☞ साहित्य-सङ्गीत-कला-विहीनः जनः कीदृशः पशुः भवति ?
- साहित्य-सङ्गीत-कला-विहीनः जनः पुच्छ-विषाण-हीनः पशुः भवति ।

## भाव-बोधनम्







☞ पशुः इव कः भवति ?
- साहित्य-सङ्गीत-कला-विहीनः जनः पशुः इव भवति ।

☞ साहित्य-सङ्गीत-कला-विहीनः जनः कीदृशः पशुः भवति ?
- साहित्य-सङ्गीत-कला-विहीनः जनः पुच्छ-विषाण-हीनः पशुः भवति ।

☞ पशुः इव जनः तृणं न खादन् अपि कथं भवति ?
- पशुः इव जनः तृणं न खादन् अपि जीवमानः भवति ।

☞ परमं भागधेयं केषाम् अस्ति ?
- परमं भागधेयं पशूनाम् अस्ति ।

☞ किमर्थं पशूनां भागधेयम् अस्ति ?
- साहित्यसङ्गीतकलाविहीनः सः पशुः तृणं न खादति, अतः पशूनां परमं भागधेयम् अस्ति, येन पशूनां भोजनं रक्षितं भवति ।

> साहित्यसङ्गीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः।
> तृणं न खादन्नपि जीवमानः, तद्भागधेयं परमं पशूनाम्।।2।।

### भावार्थः

यः मानवः काव्यम्, सङ्गीतम्, शिल्पम्, अभिनयं वा न जानाति, सः मानवः पुच्छं विषाणं च विना अपि वस्तुतः पशुः एव अस्ति । इदं पशूनां परमं सौभाग्यम् अस्ति यत् सः पशुः इव घासं न खादित्वा अपि जीवति । अनेन पशूनां भोजनं रक्षितं भवति ।

### हिन्द्यां भावार्थः

जो मनुष्य काव्य, संगीत, शिल्प, अभिनय आदि कलाओं को नहीं जानता, वह मनुष्य पूंछ और सींगों से रहित होने पर भी साक्षात् पशु ही है। यह पशुओं का बहुत बड़ा सौभाग्य है कि वह घास न खाकर भी जीवित है। इससे पशुओं के भोजन की सुरक्षा हो गई है।

### आङ्ग्लभाषायां भावार्थः

The person who is bereft of (interest in) literature, music and arts is evidently an animal without a tail or horns. That, such person survives without grazing grass is a good fortune of the (actual) animals.

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ।।3।।

*(पञ्चतन्त्रम् – 3.236)*

## पदच्छेदः

लुब्धस्य, नश्यति, यशः, पिशुनस्य, मैत्री, नष्ट-क्रियस्य, कुलम्, अर्थपरस्य, धर्मः, विद्या-फलम्, व्यसनिनः, कृपणस्य, सौख्यम्, राज्यम्, प्रमत्त-सचिवस्य, नर- अधिपस्य ।।

## अन्वयः

लुब्धस्य यशः (नश्यति), पिशुनस्य मैत्री (नश्यति), नष्टक्रियस्य कुलं (नश्यति), अर्थपरस्य धर्मः (नश्यति)। व्यसनिनः विद्याफलं (नश्यति), कृपणस्य सौख्यं (नश्यति), प्रमत्तसचिवस्य नराधिपस्य राज्यं नश्यति ।

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य।।3।।

## शब्दार्थान्

| | | | |
|---|---|---|---|
| लुब्धस्य | ('लुब्ध' अका., पुं.,ष.वि.,एकव.) | = | लोभि-जनस्य । |
| यशः | ('यशस्' सका.,नपुं.,प्र.वि.,एकव.) | = | प्रसिद्धिः,कीर्तिः । |
| पिशुनस्य | ('पिशुन' अका.,पुं.,ष.वि.,एकव.) | = | द्विजिह्वस्य , कर्णेजपस्य । |
| मैत्री | ('मैत्री' ईका., स्त्रीलि.,प्र.वि.,एकव.) | = | मित्रता । |
| नष्टक्रियस्य | ('नष्टक्रिय' अका., पुं.,ष.वि.,एकव.) | = | कुकर्मिणः / दुराचारिणः । |
| कुलम् | ('कुल' अका., नपुं.,प्र.वि.,एकव.) | = | वंशः,परिवारः । |
| अर्थपरस्य | ('अर्थपर' अका., पुं.,ष.वि.,एकव.) | = | धनलोलुपस्य । |

- धर्मः ('धर्म' अका.,पुं.,प्र.वि.,एकव.) = कर्तव्यम् ,स्वभावः ।
- व्यसनिनः ('व्यसनिन्' नका., पुं.,ष.वि.,एकव.) = दुष्ट-अभ्यासयुक्तस्य ।

**शब्दार्थान्**

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य।।3।।

- विद्याफलम् ('विद्याफल' अका.,नपुं.,प्र.वि.,एकव.) = विद्यायाः परिणामः, ज्ञानम् ।
- कृपणस्य ('कृपण' अका.,पुं.,ष.वि.,एकव.) = क्षुद्रस्य / कंजूस का (हिन्द्यर्थः) ।
- सौख्यम् ('सौख्य' अका.,नपुं.,प्र.वि.,एकव.) = सुखम् ।
- प्रमत्तसचिवस्य ('प्रमत्तसचिव' अकार.,पुं.,ष.वि.,एकव.) अर्थात् विवेकहीन-सचिवेन युक्तस्य ।
- नर-अधिपस्य ('नराधिप' अका.,पुं.,ष.वि.,एकव.) = नृपस्य ।
- राज्यम् ('राज्य' अका.,नपुं.,प्र.वि.,एकव.) = देशः / राष्ट्रम् ।
- नश्यति ('नश्' धातुः , लट्ल.,प्र.पु.,एकव.) = नष्टं भवति ।

**भाव-बोधनम्**

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य।।3।।

| | |
|---|---|
| ☞ किं नश्यति ? | ▪ यशः नश्यति । |
| ☞ कस्य यशः नश्यति ? | ▪ लुब्धस्य यशः नश्यति । |
| ☞ का नश्यति ? | ▪ मैत्री नश्यति । |
| ☞ कस्य मैत्री नश्यति ? | ▪ पिशुनस्य मैत्री नश्यति । |
| ☞ कस्य कुलं नश्यति ? | ▪ नष्टक्रियस्य कुलं नश्यति । |
| ☞ कस्य धर्मः नश्यति ? | ▪ अर्थपरस्य धर्मः नश्यति । |

- कस्य विद्याफलं नश्यति ? — व्यसनिनः विद्याफलं नश्यति ।
- कृपणस्य किं नश्यति ? — कृपणस्य सौख्यं नश्यति ।
- कस्य सौख्यं नश्यति ? — कृपणस्य सौख्यं नश्यति ।
- नराधिपस्य किं नश्यति ? — नराधिपस्य राज्यं नश्यति ।
- कस्य राज्यं नश्यति ? — प्रमत्तसचिवस्य नराधिपस्य राज्यं नश्यति ।

भावार्थः

लोभयुक्तस्य मानवस्य कीर्तिः नश्यति । रहस्यभेदिनः मित्रस्य मित्रता नश्यति । तथैव यः अकृत्यं करोति तस्य कुलं नश्यति । यः केवलं धनस्य विषये एव चिन्तयति तस्य धर्मः नश्यति । दुष्ट-अभ्यासयुक्तस्य मानवस्य विद्या नश्यति । कृपणस्य सुखं नश्यति । यस्य नृपस्य मन्त्रिणः (सचिवाः) विवेकहीनाः भवन्ति तस्य नृपस्य राज्यं नश्यति ।

भावार्थः (हिन्द्याम्)

लोभी का यश, चुगली करने वाले की मित्रता, कुकृत्य करने वाले का कुल, सर्वदा धन की लालसा रखने वाले का धर्म, बुरी आदतों वाले की विद्या, कंजूस का सुख तथा विवेकहीन मन्त्री वाले राजा का राज्य नष्ट हो जाता है।

भावार्थः (आङ्ग्लेन)

A greedy person loses fame. A rumor monger loses friendship. A wicked doer loses family. A person behind money loses dharma (strays from the path of dharma). A person with bad habits loses the fruits of education. A miser loses comfort. A king with a bad (mad) minister loses his kingdom.



पीत्वा रसं तु कटुकं मधुरं समानं
माधुर्यमेव जनयेन्मधुमक्षिकासौ ।
सन्तस्तथैव समसज्जनदुर्जनानां
श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति ।।4।।



**पदच्छेदः**

पीत्वा, रसम्, तु, कटुकम्, मधुरम्, समानम्, माधुर्यम् , एव, जनयेत्- मधुमक्षिका, असौ,

**पदच्छेदः**

पीत्वा, रसम्, तु, कटुकम्, मधुरम्, समानम्, माधुर्यम् , एव, जनयेत्- मधुमक्षिका, असौ, सन्तः , तथा , एव, सम- सज्जन-दुर्जनानाम्, श्रुत्वा, वचः, मधुर-सूक्त-रसम्, सृजन्ति ।

**अन्वयः**

असौ मधुमक्षिका तु मधुरं कटुकं रसं पीत्वा समानं माधुर्यम् एव जनयेत् ।
तथा एव सन्तः समसज्जन-दुर्जनानां वचः श्रुत्वा मधुरसूक्तरसं सृजन्ति ।।

**शब्दार्थाः**

असौ मधुमक्षिका तु समानं मधुरं कटुकं रसं पीत्वा माधुर्यम् एव जनयेत्
तथा एव सन्तः समसज्जन-दुर्जनानां वचः श्रुत्वा मधुरसूक्तरसं सृजन्ति।

| | | | |
|---|---|---|---|
| ❖ | असौ | ('अदस्' सका.,सर्वनाम.,स्त्री.,प्र.वि.,एकव.) | = एषा / यह । |
| ❖ | मधुमक्षिका | ('मधुमक्षिका' आका.,स्त्री.,प्र.वि.,एकव.) | = मधुमक्षिका / मधुमक्खी । |
| ❖ | तु | (अव्ययम्) | = निश्चयार्थबोधकम् । |
| ❖ | समानम् | ('समान' अका.,पुं.,द्वि.वि.,एकव.) | = समानरूपेण । |
| ❖ | मधुरम् | ('मधुर' अका.,पुं.,द्वि.वि.,एकव.) | = मधुररसम् । |
| ❖ | कटुकम् | ('कटुक' अका.,पुं.,द्वि.वि.,एकव.) | = कटुरसम् । |
| ❖ | रसम् | ('रस' अका.,पुं.,द्वि.वि.,एकव.) | = रसम् (मधुर-कटु-कषाय-लवणादि ) । |
| ❖ | पीत्वा | ('पा' धातुः, 'क्त्वा' प्रत्ययः) | = पानं कृत्वा । |
| ❖ | माधुर्यम् | ('माधुर्य' अका.,नपुं.,द्वि.वि.,एकव.) | = माधुरताम् । |
| ❖ | एव | (अव्ययम्) | = हि । |





असौ मधुमक्षिका तु समानं मधुरं कटुकं रसं पीत्वा माधुर्यम् एव जनयेत्
**शब्दार्थाः** तथा एव सन्तः समसज्जन-दुर्जनानां वचः श्रुत्वा मधुरसूक्तरसं सृजन्ति।

- जनयेत् (‘जन्’ धातुः,विधिलिङ्ल.,प्र.पु.,एकव.) = उत्पद्येत् (निर्माणं कुर्यात् )
- तथैव (तथा एव, अव्ययपदम्) = तेन एव प्रकारेण।
- सन्तः (‘सत्’ तका.,पुं.,प्र.वि.,बहुव.) = साधु-जनाः ।
- समसज्जनदुर्जनानाम् (‘समसज्जनदुर्जन’ अका.पुं,ष.वि.,बहु.) = सज्जनानां दुर्जनानां च समानम्।
- वचः (‘वचस्’ सका., नपुं.,द्वि.वि.,एकव.) = वचनम्,कथनम्, शब्दम् ।
- श्रुत्वा (‘श्रु’ धातोः , ‘क्त्वा’ प्रत्ययः) = आकर्ण्य, श्रवणं कृत्वा।
- मधुरसूक्तरसम् (‘मधुरसूक्तरस’ अका.,पुं.,द्वि.वि.,एकव.) = सुभाषितरूपं मधुररसम् ।
- सृजन्ति (‘सृज्’धातुः,लट्ल.,प्र.पु.,बहुव.) = निर्मान्ति, उत्पादयन्ति।




# भाव-बोधनम्

पिबति अर्थात् पानं करोति...........

- का पिबति ? ▪ मधुमक्षिका पिबति।
- मधुमक्षिका किं पिबति ? ▪ मधुमक्षिका रसं पिबति।
- मधुमक्षिका कीदृशं रसं पिबति ? ▪ मधुमक्षिका कटुकं मधुरं च रसं पिबति।
- कटुकं मधुरं रसं पीत्वा मक्षिका किं जनयति ? ▪ कटुकं मधुरं रसं पीत्वा मक्षिका माधुर्यं जनयति।
- असौ इति पदं कस्य पदस्य विशेषणम् अस्ति ? ▪ मधुमक्षिका इति पदस्य विशेषणम् अस्ति।
- के वचः शृण्वन्ति ? ▪ सन्तः वचः शृण्वन्ति।
- सन्तः केषां वचः शृण्वन्ति ? ▪ सन्तः सज्जनानां दुर्जनानां च वचः शृण्वन्ति।
- सन्तः इति पदे मूलशब्दः कः अस्ति ? ▪ सन्तः इति पदे मलूशब्दः सत् इति अस्ति।
- सन्तः वचः श्रुत्वा किं कुर्वन्ति ? ▪ सन्तः वचः श्रुत्वा मधुरसूक्तरसं सृजन्ति।
- सृजन्ति इति पदे कः धातुः अस्ति ? ▪ सृजन्ति इति पदे सृज् इति धातुः अस्ति।

## भावार्थः

यथा मधुमक्षिका कटुकं मधुरं च रसं पीत्वा माधुर्यम् (मधुः) एव निर्मान्ति तथैव सन्ताः सज्जनानां दुर्जनानां च वचनं श्रुत्वा मधुरवचनम् एव वदन्ति।

## हिन्द्यर्थः

जिस प्रकार मधुमक्खी कड़वे व मीठे रस को पीकर मीठे (शहद) का ही उत्पादन करती है, उसी प्रकार सन्त जन सज्जनों व दुर्जनों की बातें सुनकर मीठी वाणी ही बोलते हैं।

## आङ्ग्लार्थः

**A honey-bee collects nectar from flowers, both bitter and sweet and turns it into sweet honey. Similarly the noble persons listen to the words of both wicked and good but speak words of noble intensions.**

महतां प्रकृतिः सैव वर्धितानां परैरपि।
न जहाति निजं भावं संख्यासु लाकृतिर्यथा ।।5।।

### पदच्छेदः

महताम् ,प्रकृतिः, सा, एव, वर्धितानाम्, परैः, अपि ,न, जहाति, निजम्, भावम्, संख्यासु, लाकृतिः, यथा।

### अन्वयः

परैः वर्धितानाम् अपि महतां प्रकृतिः सा एव (भवति) यथा संख्यासु लाकृतिः निजं भावं न जहाति।

## शब्दार्थाः

| | |
|---|---|
| परैः ('पर' अका.,पुं .,तृ.वि.,बहुव.) | = अन्यैः जनैः । |
| वर्धितानाम् ('वृध्' धातुः, 'क्त' प्रत्ययः,पुं.,ष.वि.,बहुव.) | अर्थात् प्रशंसितानाम् । |
| अपि (अव्ययपदम् ) | = भी (हिन्द्यर्थः) । |
| महताम् ('महत्' तका.,पुं.,ष.वि.,बहुव.) | = श्रेष्ठजनानाम् । |
| प्रकृतिः ('प्रकृति' इका., स्त्रीलि.,प्र.वि.,ए.व.) | = स्वभावः । |
| सा ('तद्' दका.,स्त्रीलि.,प्र.वि.,ए.व.) | अर्थात् प्रकृतिः (तथा एव भवति) । |
| एव (अव्ययम्) | = निश्चयार्थबोधकम् । |
| यथा (अव्ययम्) | = इव । |
| संख्यासु ('संख्या' आका.,स्त्रीलि.,स.वि.,बहुव.) | = अंकेषु । |
| लाकृतिः ('लाकृति' इका., स्त्रीलि.,प्र.वि.,एकव.) | = नवसंख्या |
| निजम् ('निज' अका., पुं., द्वि.वि.,ए.व.) | = स्वकीयम् । |
| भावम् ('भाव' अका.,पुं.,द्वि.वि.,एकव.) | = स्वभावम् , प्रकृतिम् । |
| न ( अव्ययपदम् ) | = नहि । |
| जहाति ( क्रिया., `हा' धातुः., लट्ल., प्र.पु., ए.व.) | = त्यजति । |

*(लाकृतिः इति पदस्य प्रयोगः श्रीकृष्णाय अपि क्रियते । अत्र तु नवसंख्या इत्येव अर्थः भवति ।)*

विशेषणपदम् ↔ विशेष्यपदम्

वर्धितानाम् — महताम्

## भाव-बोधनम्

जहाति अर्थात् त्यजति ........

- का न जहाति ? — लाकृतिः न जहाति ।
- लाकृतिः किं न जहाति ? — लाकृतिः भावं न जहाति ।
- लाकृतिः कं भावं न जहाति ? — लाकृतिः निजं भावं न जहाति ।
- लाकृतिः कासु निजं भावं न जहाति ? — लाकृतिः संख्यासु निजं भावं न जहाति ।
- श्लोके 'प्रकृतिः' इति पदस्य कः अभिप्रायः? — 'प्रकृतिः' अर्थात् स्वाभावः इति अभिप्रायः ।
- केषां प्रकृतिः निजं भावं न जहाति? — महतां प्रकृतिः निजं भावं न जहाति ।
- कीदृशानां महतां प्रकृतिः निजं भावं न जहाति? वर्धितानां महतां प्रकृतिः निजं भावं न जहाति ।
- वर्धितानाम् इति पदं कस्य पदस्य विशेषणम् अस्ति?
- वर्धितानाम् इति पदं महताम् इति पदस्य विशेषणम् अस्ति ।
- कैः वर्धितानां महतां प्रकृतिः निजं भावं न जहाति?
- परैः वर्धितानाम् अपि महतां प्रकृतिः निजं भावं न जहाति ।
- संख्यासु का निजं भावं न जहाति?

**भावार्थः**

अन्यैः जनैः प्रशंसिताः अपि महापुरुषाः स्व-सरलस्वभावं न त्यजन्ति । यथा 9 इति अंकः स्वस्य आकृतिः कदापि न त्यजति । नवसङ्ख्या अन्यैः अङ्कैः गुणिता चेत् अपि गुणलब्धेः अङ्कानां योगः नव एव भवति ।

**भावार्थः (हिन्द्याम्)**

दूसरों के द्वारा प्रशंसित होने पर भी महापुरूषों का स्वभाव उसी प्रकार नहीं बदलता जिस प्रकार 'नौ' अङ्क अपना स्वभाव नहीं छोड़ता। (अन्य अंकों से 'नौ' का गुणन करने पर जो गुणलब्धि मिलती है उसके अंकों को जोड़ने से फिर से ९ ही मिलता है।

**भावार्थः (आङ्ग्लेन)**

The number 9 when multiplied by other numbers does not lose its characteristics (meaning sum of the digits of 9 or its multiples remain 9 only i.e. 2 × 9 =18 [1+ 8 = 9]. 4×9 = 36 [3+ 6 = 9] etc.,). Similarly great men never lose their characteristics under any situation

स्त्रियां रोचमानायां सर्वं तद् रोचते कुलम् ।
तस्यां त्वरोचमानायां सर्वमेव न रोचते ।।6।।

**पदच्छेदः**

स्त्रियाम्, रोचमानायाम्, सर्वं, तत् ,रोचते, कुलम्,तस्याम्, तु ,
अरोचमानायाम्,सर्वम्,एव, न, रोचते ।

**अन्वयः**

स्त्रियां रोचमानायां तत् सर्वं कुलं रोचते। तस्याम् अरोचमानायां तु सर्वम् एव न रोचते।

स्त्रियां रोचमानायां तत् सर्वं कुलं रोचते।
तस्याम् अरोचमानायां तु सर्वम् एव न रोचते।

## शब्दार्थाः

- स्त्रियाम् ('स्त्री' ईका.,स्त्रीलि.,स.वि.,ए.व.) = महिलायाम्।
- रोचमानायाम् ('रोचमाना' आका.,स्त्रीलि.,स.वि.,ए.व.) = प्रसन्नायाम्।
- तत् ('तद्' दका., सर्व.,नपुं.,प्र.वि.,ए.व.) अर्थात् कुटुम्बः, कुलम् ।
- सर्वम् ('सर्व' अका.,नपुं.,प्र.वि.,ए.व.) = सम्पूर्णम् , सकलम्।
- कुलम् ('कुल' अका.,नपुं.,प्र.वि.,ए.व.) = परिवारः, कुटुम्बः।
- रोचते ('रुच्' (आत्मनेपदी) धातुः,लट्ल.,प्र.पु.,ए.व.) = शोभते, शोभां प्राप्नोति।




स्त्रियां रोचमानायां तत् सर्वं कुलं रोचते।
तस्याम् अरोचमानायां तु सर्वम् एव न रोचते।

## शब्दार्थाः

- तस्याम् ('तद्' दका.,स्त्रीलि.,स.वि.,ए.व.) अर्थात् स्त्रियाम् ।
- अरोचमानायाम् ('अरोचमाना' आका.,स्त्रीलि.,स.वि.,ए.व.) = अप्रसन्नायाम्।
- तु (अव्ययपदम्) = निश्चयार्थबोधकम् ।

## भाव-बोधनम्

स्त्रियां रोचमानायां तत् सर्वं कुलं रोचते।
तस्याम् अरोचमानायां तु सर्वम् एव न रोचते।

रोचते अर्थात् शोभते.........

- ☞ किं रोचते ? ▪ सर्वं कुलं रोचते।
- ☞ सर्वं कुलं कदा रोचते ? ▪ रोचमानायां सर्वं कुलं रोचते।
- ☞ कस्यां रोचमानायां सर्वं कुलं रोचते ? ▪ स्त्रियां रोचमानायां कुलं न रोचते।
- ☞ कुलं कदा न रोचते ? ▪ स्त्रियाम् अरोचमानायां कुलं न रोचते।
- ☞ रोचमानायाम् इति पदस्य कः अर्थः? ▪ 'शोभमानायाम्' इति अर्थः भवति।

स्त्रियां रोचमानायां तत् सर्वं कुलं रोचते।
तस्याम् अरोचमानायां तु सर्वम् एव न रोचते।

### भावार्थः

महिला यदि प्रसन्ना भवति तर्हि सम्पूर्णं कुलम् आनन्दितं भवति। परन्तु यदि महिला दुःखिता भवति तर्हि सर्वं गृहम् अरोचकं भवति।

### भावार्थः (हिन्द्याम्)

स्त्री के प्रसन्न होने पर सारा परिवार प्रसन्न रहता है। और स्त्री के दुःखी होने पर सारा परिवार अप्रसन्न अथवा दुःखी रहता है।

### भावार्थः (आङ्ग्लेन)

When the woman (of the house) is pleased, the entire clan (family) remains happy. If she is displeased, the entire family remains unhappy.

# ०प्रथमः पाठः अभ्यासः कुरु? (पाठ-1 के अभ्यास के प्रश्नों का उत्तर दीजिए।)

धन्यवाद